चतुस्त्रिंशदङ्गुले धन्यं दानधर्मभाजनं च पञ्चत्रिंशदङ्गुले मरणं स्वयं करोति। षट्त्रिंशदङ्गुले विजयं भर्त्तुर्ददाति सप्तत्रिंशदङ्गुले पराभवमरिभिः करोति। अष्टत्रिंशदङ्गुले शत्रुप्रमर्दनं करोति नवत्रिंशदङ्गुले कुजनैरेव परिक्लेशं नयति। चत्वारिंशदङ्गुले कन्यालाभमरिजयं च प्राप्नोति व्रणेन खड्गस्थितेन। तथैकचत्वारिंशदङ्गुले शत्रुभ्यः पीड़नाद्भयं लभते द्विचत्वारिंशदङ्गुले स्वराष्ट्रवर्द्धिमन्त्रित्वं-त्रिचत्वारिंशदङ्गुले दुःखं प्राप्नोति सेनापतिरेव भर्त्ता भवति। चतुश्चत्वारिंशदङ्गुले श्रियं विपुलां लभते। पञ्च-चत्वारिंशदङ्गुले व्रणो भयङ्क षट्चत्वारिंशदङ्गुले व्रणाः सुखावाहा भवन्ति। सप्तचत्वारिंशदङ्गुले स्वपक्षं पीड़यति परपक्षं वर्द्धयति अष्टाचत्वारिंशदङ्गुले राजश्रियं भुङ्क्ते एकोनपञ्चाशदङ्गुले शत्रोर्विजयं लभते। पञ्चाशदङ्गुले कुलवृद्धिर्भवति"। एकत्रिंशदाद्यङ्गुलिषु व्रणे फलविशेषोऽभिहितः। अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम्। प्रधान-देहसंभूतैरन्यास्थिभिररिन्दम। लोहं प्रधानं खड्गार्थे प्रशस्तं तद्विशेषतः। खरीकटुरुक्षाषिकावङ्गसूर्य्यारकेषु च। विदेहेषु तथाङ्गेषु मध्यमग्रामचेदिषु। सह-ग्रामेषु वीरेषु तथा कालञ्जरेऽपि च। लोहं प्रधानं खड्गानां नवानां शृणु लक्षणम्। खरी कटुरुजा ये च दर्शनीयाश्च ते स्मृताः। कार्ये दक्षाश्च ऋषिकाम्मृदवो गुरवस्तथा" तीक्ष्णाम्छेदसहा वङ्गा दृढ़ाः सूर्य्यारकोद्भवाः। सुदृढाश्चैव विज्ञेया प्रभवन्ति विदेहजाः। अङ्गदेशोद्भवास्तीक्ष्णाः सहजास्ते दृढास्तथा। वेगवन्तस्तथा तीक्ष्णामध्यमग्राम-सम्भवाः। असारलघवस्तीक्ष्णाश्चेदिदेशसमुद्भवाः। सह-ग्रामोद्भवाः खड्गाः सुतीक्ष्णालघवस्तथा। निर्व्वला निर्मला खड्गावीरदेशसमुद्भवाः। कालञ्जराभारसहास्तेषां वक्ष्यामि लक्षणम्। शतार्द्धमङ्गुलानां तु श्रेष्ठः खड्गः प्रकीर्त्तितः। तदधोमध्यसंज्ञाभाक् ततोहीनं न धारयेत्। प्रमाणाभ्यधिकं देव! छिन्नवंशन्तथैव च। दीर्घः सुमधुरः-शब्दोयस्य खड्गस्य भार्गव!॥ किङ्किणीसदृशस्तस्य धारणम् श्रेष्ठमुच्यते। खड्गः पत्रपलाशाग्रोमण्डलाग्रश्च शस्यते। करवीरपलाशाग्रसदृशश्च विशेषतः। मद्दीघृतसगन्धश्च पद्मोत्पलसुगन्धिकः। वर्णतश्चोत्पलाकारः सवर्णो गगनस्य च। समाङ्गुलस्थाः शस्यन्ते व्रणाः खड्गेषु भार्गव!। श्रीवृक्षपर्वताकारवंशवस्तनिभाश्च ये। मङ्ग-ल्यानां तथान्येषां सदृशा ये च भार्गव!। काकोलूकार्कबन्ध्याभा विषमाङ्गुलिसंस्थिताः। वंशानुगाः प्रभूताश्च न प्रशस्ता कदाचन। खड्गे न पश्येद्वदनं वृथा न शृणुयादसुम्। न चास्य कथयेन्मूल्यं जातिं देशं कथञ्चन। उत्सृष्टो न स्पृशेत् खड्गं निशि कुर्याच्च शीर्षके। दिवा च पूजयदेनं गन्धमाल्यादिसम्पदा। खड्गं प्रशस्तं मणिहेमचित्रं कोशे सदा चन्दन-चर्च्चयाढ्यम्। संस्थापयेद्भूमिपतिः प्रयत्नात् यतेत चेह स्वश-रीरवच्च" विष्णुध०। देवीपु०। "खड्गस्य लक्षणं वक्ष्ये त्रिशि-खस्य तु सुन्दरि!। नान्यशस्त्रोद्भवं कार्यं मृदुलोहमयन्तथा। स्फुटितं खण्डितं ह्रस्वं सव्रणं साधितं तथा। मृदुलोहे-नचारभ्य सन्धितो मरणं भवेत्। सव्रणेनापि हृद्रोगी रेखायां पातकी भवेत्। भार्य्या माता तथा पुत्रो म्रियते खण्डितेन च। ह्रस्वेन लाघवं लोके दीर्घतापि ह्रस्विद्विदा। अन्यशस्त्रोद्भवेनापि संभवेन्मरणम् ध्रुवम्। पञ्चाशदङ्गुलं खड्गं त्रिशिखञ्च सुरेश्वरि। ईदृशङ्कारयेत्खड्गमाशु सिद्धिफलप्रदम्"। अस्यते क्षिप्यते अस-इन्। २बाणे "तिस्रः पत्न्योऽसिपथान् कल्पयन्त्यश्वस्य सूचीभिः" कात्या० २०।७।१। "असेः बाणस्य पथः मार्गान्" कर्क० त्रि०। ४क्षिप्ते अस्त्रगण्डः। [हेम०।

**असिक** न० असि-संज्ञायां कन्। अधरचिवुकयोर्मध्यभागे-

**असिक्नी** स्त्री सो-क्त सिता केशादौ शुभ्रा जरती तद्भिन्ना अवृद्धा क्नादेशः ङीप् च। अन्तःपुरचारिण्यामवृद्धायां १प्रेष्यायाम्, २नदीभेदे च। ३रात्रौ निरु० तस्याश्च सूर्य्य-तेजःशून्यतया असितत्वात् तथात्वम् "त्वचमसिक्नीं भूमनो दिवस्परि" ६।७३।५। "त्वद्भिया विशआयन्न-सिक्नीरसमानाः" ऋ० ७।५।२। "असिक्नीरसितवर्णा राजस्यः" भा० वीरस्य प्रजापतेः ४कन्याभेदे। असिक्नी-मावहत् पत्नीं वीवरणस्य प्रजापतेः" इति हरि० ३अ०। "छन्दसि क्नमेके" वार्त्ति० उक्तेः छन्दस्येवायं क्नादेशः लोके तु क्वचित्। "असिक्नी स्यादवृद्धायामित्यमरः"।

**असिगण्ड** पु० असिः क्षिप्तोगण्डो यत्र। गण्डोपधाने।

**असिजीविन्** पु० असिना तद्व्यापारेण जीवति जीव-णिनि। शस्त्रव्यापारेण युद्धादिनाजीविकावति विप्रस्य तथात्वे नि-न्द्यत्वम् "असिजीवी मसीजीवी काण्ड पृष्ठश्च धावक" इत्युक्तेः।

**असित** पु० सितः शुभ्रः विरोधे न०त०। १शुभ्रवर्णभिन्ने तद्वि-रुद्धे कृष्णवर्णे। २तद्वति त्रि०। ३कृष्णपक्षे पु०। ४नीलौषधौ अन्तःपुरचारिण्यामवृद्धायां ५प्रेष्यायाञ्च स्त्री ङीप् कृष्णवर्णपरतया क्नश्च असिक्नीत्येव। "असितगिरिनिभं स्यात् कज्ज्वलं सिन्धुपात्रम्" पुष्पदन्तः "तन्तुमवव्ययन्नसितम्" ऋ०४,१२,४, ५यमुनायां तस्याः कृष्णवर्णत्वात् तथात्वम्